

सचित्रम् ओमरखैयामम्

Presented by the Ministry of Education,
Govt. of India.

अनुवादकः

डा० वीरेन्द्रकुमार भट्टाचार्यः

संस्कृत पुस्तक भाण्डार

Published by
Shyamapada Bhattacharjee, Sanskrit Pustak Bhandar
38 Bidhan Sarani, Calcutta-6

First Published March 1972

Price : Rs. 12.00 (Popular Ed.)
Rs. 15.00 (Library Ed.)

Printed by D. Dutta, Arunima Printing Works,
81 Simla Street Calcutta-6

खैयामात्मरुतं हि संस्कृतगिरा सद्यो मयाऽनूदितं
वृत्तं चात्र वृत्तं ससार्धयमकं शार्दूलविक्रीडितम् ।
मद्याम्नाय इह प्रगीयत उत प्रेमोन्मदः संस्तुतो
ग्राह्यं काव्यमिदं तथापि सुधियां प्रज्ञार्चिषा दीपितम् ॥

FOREWORD

As in the case of my first drama, *Kavikālidāsam,* the proximate cause of this translation of the *Rubaiyāt* was another, which was produced by a Sanskrit scholar and which has merits of its own. A few friends, including Dr. Gopikamohan Bhattacharyya, suggested that I try my hand at a fresh translation. And the result is this Sanskrit version of a century-odd of Omar Khayyam's quatrains, done within the short period of a fortnight. It was first published in *Anvīkṣā,* the distinguished research journal of the Sanskrit department of Jadavpur University. I am grateful to its Editorial Board for having encouraged me in my difficult task and having permitted, also, the publication of the poem in its present form.

I should now mention a few facts about the work itself. The metre adopted is *Śārdūlavikrīḍita,* but the first caesural portion of every line has been subdivided into two equal halves, and a rhyme scheme has been introduced, which is unusual in Sanskrit verse. The rhyme pattern is *aaba,* exactly as in the original rubaiyāt and in my Bengali translation of Omar Khayyām, while "the odd man out"—the third line—has been given an internal rhyme, with no parallel in the prototype. As a result, the sombre metre has assumed a lighter air, thereby becoming a fitter medium, in my opinion, for the philosophic quatrains with an aura of poetic fervour. It is, however, for the experts to judge how far I have succeeded in re-echoing Omar's rhythm in an alien tongue.

A word must be said now about the life and philosophy of Omar Khayyām, the Persian bard, whose fame has spread far and wide through the translation of his verses by Fitzgerald and others. The poet-philosopher was born, at Naishāpur in the Khorasān district of Iran, in the latter half of the eleventh and died in the first quarter of the twelfth century of the Christian era. He was by birth probably a tentmaker (Khayyām), but soon he started "stitching the tents of science", acquired mastery in pure mathematics and astronomy, and—quite like many a master scientist of today—endeavoured to solve the riddles of the universe, specially (in his case) those of human life, death and fate. His genius flourished under the patronage of Sultan Malik Shah : he was associated with the reform of the calendar, contributed to various branches of theoretical and practical science, and came to be acknowledged as "the very paragon of his age". His philosophic pursuits inclined him towards a doctrine of predestination, with man as a clay puppet in a universal pantomime, destiny as a cruel ace performer playing the double role of acrobat and clown, under the

leading strings of a behind-the-scene God, the Master of the show. A vital corollary of this fatalism wsa, not a grovelling submission but an open revolt with a view to make the most of a bad bargain. Omar was a highbrow hedonist like Lucretius: his mission was not the preaching of a facile slogan of "eat, drink and be merry", but to engross oneself in scientific labours and only seek recreation in a refined enjoyment of the pleasures of sense (—wine and woman not excepted, though not the only idols). As a courageous man, he *lived* his philosophy—practising the lessons he preached. His slender theism was coloured by agnosticism, or at least scepticism, and the almost inevitable consequence was a wistful pessimism.

This is not the place to discuss in detail the merits and drawbacks of such a view. It seems obvious to his present translator, however, that there lives more faith in a vocal honest doubt than in a secretive esoteric dogmatism, adorning its mystic truth with a halo of crass exultation over daily converse with the nebulous unknown. And there is more sincerity in a humble confession of nescience and acquiescence in the human weakness for sense than in a cocksure claim to omniscience and indulgence in "supra-sensual" orgies inducing temporary lunacy. Viewed in this light, the lovely quatrains, shot through and through by a sharp pang of the quivering flesh, have a perpetual appeal to such solitary souls as are "troubled by a spark" of doubt. In India, we had in Chārvāka a philosopher akin in spirit to Lucretius, Epicurus and Omar, but he is not known to have sung to the lyrical Muse; even his philosophical writings were suppressed by orthodox zealots. There are available several translations of the *Rubaiyāt* in Bengali, and I hope that the present Sanskrit translation in rhyming tunes will not fall on deaf ears, for most of the present-day lovers of Sanskrit literature have a sufficiently catholic outlook in the academy no less than in the workaday world.


It only remains to offer cordial thanks to my publisher and printers, who have spared no pains or expense to make the book as attractive as possible without charging too high a price. May the soul of Omar—if he had any—enjoy this Sanskritised essence of his garland of roses, and may its perfume delight also the souls of his contemporary sworn enemies, the Sūfis,—unless they have since "merged, blended and been completely transmuted" in the bosom of the inscrutable Absolute!

Writers' Buildings,
Calcutta
The 15th March, 1972

B. K. Chatterji

खैयामस्मरणम्

वासन्त्यां रजनौ रुवन्ति परितो नक्तङ्गमा मद्वनं
सास्रं स्रावयते तु यौवनरसं स्वभ्रान्त्यले दर्शनम् ।
माध्व्यां मन्दरति र्ममौमरकवे माध्यस्थ्यमोष्ठासवे
श्लोकैस्ते मदुरः करोम्यहणितं तन्त्र्यां हृदो गुञ्जनम् ॥



॥ १ ॥

कान्ते जागृहि मे वृणुष्व गगने सप्ताश्ववाहं रथं
शम्पा भीरुपदाः प्रयान्ति सहसा गुप्तं तमिस्रापथम् ।
बालार्को मृगयां विवष्टि चपलः पृथ्व्यां मुदा विह्वलो
बन्दीकृत्य रमं नृपस्य निलयं क्षिप्त्वा शरं ज्याश्लथम् ॥

॥ २ ॥

दिङ्नार्यो हि यदा स्वनूपुररवै-

निंद्रां व्यलुम्पन्त मे

स्वप्नेऽहं वचनं शृणोमि मधुरं


देव्या नु पान्थाश्रमे ।

"तूर्णं जागृहि भोः मनः सहृदय

द्राक्षारसैः पूरय

प्राणोष्णा मदिरा विशुष्यति न चेत्

सद्यो हि सूर्याक्रमे ॥"





॥ ३ ॥

यावत् कुक्कुटका रुवन्ति चकितं

तत्रापि कण्ठोद्गता-

स्तावद् व्यग्रजना वदन्ति-"शरणं

काङ्क्षामहे सुव्रताः ।

तृष्णार्ताः पथिका वयं क्षणमतः

पानं च कुर्मस्तत-

स्त्यक्त्वा पान्थगृहं पुनः पथिचरा

यामस्तु भाग्यक्षताः ॥"



॥ ४ ॥

वर्षारम्भदिने प्रिये समुदितं
सुप्ते हिं वाञ्छादलं
चित्तारामजनः प्रयाति निभृतं
चिन्ताकृते शाद्वलम् ।
मोसार्षे विशदौ करौ प्रसरत-
श्छायातरोः शीर्षतो
यीशो निःश्वसनं करोति सुरभि
मन्दानिलं निर्मलम् ॥

॥ ५ ॥

लुप्तं दीप्तिमयं त्विरामनगरं
रक्तप्रसूनान्वितं
चित्रं पात्रमहो तथैव विगतं
जाम्सेदहस्ताश्रितम् ।
अद्यापि क्षरितुं हृदो रसमलं
द्राक्षालता पेशलं
नद्याः श्यामतटे तथापि हसति
श्रीलं वनं पुष्पितम् ॥



॥ ६ ॥

मौनं संश्रयते स दायुदनृपो
यद्वाग्मिता विश्रुता
कुञ्जान्ता बहुशस्तु पह्लवगिरा
नक्तङ्गमस्याप्लुताः ।
"काङ्क्षे कण्ठरुचिं सुपेयकुहकं
रक्तं सुरालक्तकं
मह्यं यच्छ लते प्रणंक्ष्यति चिरं
गण्डस्य मे पाण्डता" ॥





॥ ७ ॥

उद्यानं प्रविश प्रिये स्पृश तथा
माध्वीकमोष्ठाधरे
शैत्यग्लानिमतः समर्पय हसै-
र्वासन्तहर्षाध्वरे ।
आयुस्त्वो विहगो वृणाति पवनं
स्थित्वेह मन्ये क्षणं
कर्णं दास्यति नो पतत्रशरणं
कस्यापि चार्तस्वरे ॥



॥ ८ ॥

पात्रं प्राणमयं यतस्तु वसते
नैशापुरे वाऽन्यतो
दुःखार्ता किमुत प्रयच्छति मुदा
कान्ता सुरां कुम्भतः ।
आयुष्या मदिरा प्रतिक्षणमहो
याति स्रवन्ती रहो
जीर्णैः पत्रचयै नृजीवनमरोः
प्रान्ते कृतः पर्वतः ॥

॥ ९ ॥

पश्य त्वं रुचिरं विचित्रपटलं
पुष्पाकरं जाग्रतं
येषां ह्यो नयनं विकाशमगमत्
तानि क्व वा साम्प्रतम् ।
कैकोवादकथां किमु स्मरसि भोः
जाम्सेद्नाम्नो विभोः
पुष्पाणां जरतां समाधिविवरे
नव्याङ्कुरं तूद्गतम् ॥



॥ १० ॥

केकोवादमितं विहाय कुरुषे
खैयामसङ्गं वने
खैखस्तु श्च गत श्चिराश्रुनयनो
भाग्यं स्मृते गुञ्जने ।
रुस्तामो यततां रणाय रमतां
हातेम इष्टौ सतां
विस्मृत्य प्रगतान् कुरुष्व वचनं
प्रेमाप्लुतं निर्जने ॥





॥ ११ ॥

यास्यामि त्वरितं त्वया सह सखि
त्यक्त्वा विरूपां स्थलीं
पश्यावः परितः सुकृष्टधरणिं
शस्यान्वितां श्यामलीम् ।
भृत्यो नास्ति तथा न वा नरपतिः
कस्यास्ति राज्ये रतिः
शष्पाङ्के ललिते विलुठ्य खलु ते
दास्यामि रागाञ्जलिम् ॥



॥ १२ ॥

कुर्वः कल्पगृहं सुनिर्जनवने रम्यांशु वल्लीतलं
रक्ताभां मदिरां पिवामि सरवं काव्यासवं पुष्कलम् ।
सङ्गीतं मधुरं च गायसि तदा यन्मूर्छना स्वप्नदा
पश्यामि त्रिदिवं सखि प्रकटितं कुञ्जे हि हास्योच्छ्वलम् ॥

| १३ ||

केचिद्राजपदं नृणां चिरतृषां
मन्यन्त इष्टं परं
केचिद्वा त्रिदिवं सुखालयमतं
मृग्यन्ति तेषां वरम् ।
तूर्यं वादयते मुहुर्नु विजने
कोऽलीकलोकाङ्गने
सद्यो हि प्रचिते सुधी विलसति
ग्राह्यं भवेन्नापरम् ॥





|| १४ ||

ऊर्णाजालमहो नरो रचयति
स्वप्नातुरो दुर्दशं
बन्दीकर्तुमतः सुवर्णहरिणं
तस्मिन् रतश्चानिशम् ।
निःश्वासस्तु यदा विनिर्गत इतः
प्रश्वास ऊर्ध्वं श्रितो
मृत्यू रञ्जयते नृमर्मरुधिरै-
रायुष्यतन्तुं भृशम् ॥



॥ १५ ॥

लज्जारक्तमदः शृणोमि चकितं
पुष्पं भणत् सस्मितं—
"संलापं शृणु भोः मिथः सुमनसां
रात्रिन्दिवं गुञ्जितम् ।
तृष्णार्ता सततं च कण्टकवृता
प्रेम्णस्त्वहं गर्विता
भृङ्गेभ्यो रुचिरं ददामि सुरभिं
काम्यञ्च वक्षोऽमृतम् ॥"

॥ १६ ॥

आशामन्त्रवशो रिरंसत उरौ
संसारमार्गे नरो
वाञ्छापूरणकं प्रपद्यत इह
प्रायेण भस्माकरः ।
तामस्यां रजनौ तनोति किरणं
खद्योतिका हि क्षणं
किंस्विद्धैमकणो मरौ विलसति
स्निग्धो नु वा भास्वरः ॥



॥ १७ ॥

भाण्डारे सुधिया सुवर्णसदृशं
शस्यं यदि स्थाप्यते
वात्यायां यदि वा द्वितीयहलिना
बीजाङ्कुरं कीर्यते।
द्वावप्येकफलं किमित्यरुचिरं
तौ लब्धवन्तौ चिरं
चित्रं नात्र यथा समाधिनिहितो
मर्त्यो न सञ्जायते ॥



॥ १८ ॥



पान्थानां भवनं विचित्रमहह
क्षामं यथा प्रान्तरं
सिंहद्वारयुगं भृशं दहकरं
कृष्णाञ्जनं दुस्तरम्।
आयान्ति प्रसभं तथाप्यगणिताः
सम्राज ईर्षान्विता
हिंसादम्भकृतैः क्षणं मुदमिता
यान्ति ध्रुवं सत्वरम् ॥



॥ १६ ॥

यत्रानन्दयत ह्यवो मदरयो
जाम्सेद-रङ्गालयं
तत्रैवाद्य सुखं मृगेन्द्रसहिताः
स्युर्गोधिका निर्भयम् ।
वाह्रामस्य शिरो दलन्ति शलभा
रात्र्यां दिवा गर्दभाः
किं दुर्दैवमहो नृदम्भवलयो
श्चिह्नं प्रपन्नं लयम् ॥

॥ २० ॥

प्रासादा बहवः प्रवालखचिता
अभ्रंलिहाग्रा स्तथा
राजन्ते स्म भृशं मयूखनिचयै
र्हर्षोज्ज्वलाः सर्वथा ।
कुत्राद्य प्रगताः सुमञ्जुलरवाः
सङ्गीतनृत्तैः सभाः
प्राप्ता हा श्रुतयो र्मुहु र्घुलघुलारावैः
प्रकीर्णा व्यथा ॥



॥ २१ ॥

नैषा कल्पकथा कवे र्लपति यां
स्वप्नो दिवा पानजो
दत्ते गन्धमदं सुरक्तकुसुमं
राज्ञः समाधे रजः।
रक्तस्नातपदा किल प्रियलता
पुष्पाणि सूते तथा
तन्व्या नेत्रजलं निपीय नलिनं
यायाल्ललामं स्रजः॥





। २२ ॥

शय्यां पुष्पमयीं श्रयावह इमां
रम्योत्सतीरे क्षणं
श्यामं शष्पदलं सदा रचयति
प्रान्तेष्वदः प्राङ्गणम्।
तस्याङ्गं ललितं सुपेलवतनु
क्लिष्टं न कुर्या ननु
कन्यायाः किमु तत् स्वमर्ममुकुलं
कम्प्राश्लथं चुम्बनम्॥



॥ २३ ॥

रिक्तं पात्रमिदं कवोष्णसुरया पुर्णीकृथा रंहसा
भूताश्रुस्रवणं भविष्यविरुतं धूनोमि रक्ताम्भसा ।
आस्त्वं मन्त्रयसे किमस्ति दयित श्वोऽन्यन्नियत्या ऋत
आर्ये श्रान्तिहरं समाधिशयनं मृत्युर्विधत्तेऽञ्जसा ॥

॥ २४ ॥



दिव्याङ्गा ललना स्तथा नरवराः
प्रेम्णाऽभवन् विह्वलाः
कुञ्जेऽस्मिन् रभसे दिनान्यकलयन्
जाताःपुन निश्चलाः ।
आवाश्चात्र सखि प्रपीतमदिरौ
लीलारसान्तर्गिरौ
यास्यात्र स्त्वरितं प्रियाङ्कमवनी
दत्ते हि नौ वत्सला ॥

॥ २५ ॥



आवाभ्यामनिशं निकुञ्जनिलये
भृङ्गैः कृतं गुञ्जितं
तस्याधस्त्वधुना त एव शयणे
तिष्ठन्ति मे शङ्कितम् ।
आवाश्च प्रमदे तथैव तरसा
गच्छेव निद्रालसा—
वन्ये वा खलु के भवन्त्यनुचराः
को वेत्ति तन्निश्चितम् ॥




॥ २६ ॥

पञ्चत्वं झटिति प्रयान्ति निखिला
जीवास्तु निःसंशयं
गाय प्रेमकलं प्रलुण्ठ रसितं
प्रेष्ये कुरु प्रत्ययम् ।
आयुः क्षीणबलं चलेत् प्रतिदिनं
द्राङ् नेदयद्दुर्दिनं
मृत्यो र्भीष्ममरौ क्व तिष्ठति सुरा
गीतं प्रिया हा लयम् ॥

॥ २७ ॥

आ प्रातर्दिवसं हि कर्मनिरताः
केचिन्मनुष्या भृशं
केचिच्चान्यजना भविष्यलषिता
जाग्रत्यतन्द्रा निशम् ।
दत्ते भी स्तिमिरे प्रवोषकवरो
वार्तां न उच्चैस्वरो—
"मूर्खा अन्धनराः सुलभ्यमिह वो
भस्मं ततस्तादृशम् ॥"



॥ २८ ॥

ह्यस्तन्द्राप्सरसो नु कर्णजपितं
किंचिन्मयाऽकर्णितं—
"नित्यं स्यादुषया प्रसूननयनं
सस्नेहमुन्मीलितम् ॥"
भूयिष्ठं किमिति श्रुतिप्रमथनं—
सञ्जातमागुञ्जनं—
"जागर्त्यत्र हि यत् सुपर्णममलं
म्लायेद् द्रुतं निश्चितम् ॥"





॥ २९ ॥

"भूलोको वसते करामलकवद्
द्योलोक आस्ते तथा"—
तत्त्वज्ञानवतां वचांसि सततं
कर्णागतान्यन्यथा ।
दृश्यन्ते न तु ते परार्थवचनाः
शान्ता श्रुते र्यन्त्रणा
जिह्वा नृत्यति किं समाधिवसतौ
हा वाङ्मयी मूढता ॥



॥ ३० ॥

धावन्त्येहि सखि प्रलापचटुलं
नाकर्णय व्याहृतं
मुक्तं श्यामिकया सुवर्णमिव यत्
तन्मे ध्रुवं जल्पितम् ।—
"ब्रह्माण्डे नियतं कुरङ्गसरणं
चञ्चल्यते जीवनं
सौगन्ध्येन च यद्ध विनन्दयति नः
पुष्पं क्षणैस्तन्मृतम् ॥"

॥ ३१ ॥

तत्त्वं लिप्सुरहं तदा प्रभृति मे
लब्धं यदा यौवनं
विद्वद्भ्यो बहुशो भ्रमन्नश्रृणवं
कूटार्थकं गर्जनम् ।
नित्यं ते तु बभुः कुतर्कमुदिता
ज्ञानत्विषा वर्जिता
अन्तःसारहृतं क्व तृप्यति नु मे
वैतण्डिकाच्चर्यं धनम् ॥



॥ ३२ ॥

तैः सार्धं हि मया [illegible]

दृष्टं [illegible]

सोऽत्राहं [illegible] च [illegible]

[illegible] मार्जितम् ।

आयान्तः स्वजनैः [illegible]

सत्यं समुदीरितं—

"कन्याऽसीत इह [illegible]

[illegible] ॥"



॥ ३३ ॥

[illegible]

[illegible]

[illegible]

[illegible] ।

किं [illegible]

[illegible]

[illegible]

[illegible] ॥





॥ ३४ ॥

नापृष्टः किमपि त्वहं कुमतिभि-
हन्तात्र कै र्वाहितो
निर्व्यूढश्च पुन स्तथैव सहसा
क्लेशोच्चयै र्धर्पितः ।
हा स्पर्धा विपुला विडम्बयति मां
दत्ते जुगुप्सामिमां
पात्रं पूर्णमतः कुरुष्व दयिते
माध्व्याश्रयो मेऽर्थितः ॥

॥ ३५ ॥

स्वप्नेऽहं सुरभे परेद्यु रगमं
छायापथं मेदुरं
मार्गे प्राप शनैः शनिग्रहमपि
ज्वालाध्वजै र्बन्धुरम् ।
मन्ये धीकिरणैः प्रहेलिनिचयः
स्वच्छीकृतो लोकयो-
र्मृत्यु र्भाग्यमिति द्वयं न तु मया
भिन्नं तमिस्रापुरम् ॥





॥ ३६ ॥

मृत्युद्वारमये कथं प्रविशसि प्राला न नात्कुञ्चिका
दुर्ज्ञेया नियतिः प्रगुण्ठनवती नृणां किं वञ्चिका ।
एतन्मे द्रविणं त्वदीयमपरं पिङ नः प्रपन्नकं
गच्छेत् सिन्धुतलं समाधिपरतो बुद्धिस्तु खेदात्मिका ॥

॥ ३९ ॥

ओष्ठाभ्यां हि ततः स्पृशामि मधुनः
पात्रं मनाङ् मृण्मयं
पृच्छामि—"प्रिय किं नु मर्मरवं
त्वं वेत्सि मृत्योच्चयम् ?"
चुम्बित्वा रुचिरं सगद्गदमहो
प्रोवाच मां तद् यदो—
"यावज्जीवमपि प्रणन्दस इह
त्वं मज्ज मध्या त्वयम् ॥"





॥ ४० ॥


ज्वालां चित्तगतां निरस्यति मम
प्रीत्या हि यत् पात्रिकं
निष्पन्दं नितरामनुष्णमरवं
किं तच्चिरं मार्तिकम् ?
यः स्पर्शोऽप्यधुना तुषारविधुरो
नासीत् स वह्निस्फुरो
नैच्छद् रक्तरुचि कपोलयुगलं
वक्षो न लोलोर्मिकम् ?॥





॥ ४३ ॥

कुम्भात्चेत् क्षरिताः सुरामृतकणा
भूम्याधरे सञ्चिताः
शष्पं यास्यति किं सुपर्णमयतां
वल्ली भवेत् पुष्पिता ?
किं प्रोन्मीलयते निपक्ष्मनयनं
मृत्योः प्रबुद्धः क्षणं
ह्लादं हन्त कथं लभन्त इह वा
सर्वेन्द्रियैर्वञ्चिताः ?





॥ ४४ ॥

ऊर्ध्वं दृष्टिमतो विनिक्षिपति किं
नीलच्छदः प्रान्तरे
तिग्मांशोः मुकुटं करोग्रमदिरां
लब्धुं दिवा स्वान्तरे ?
पुष्पाभा मनुजाः सतृष्णकलसा-
स्तिष्ठेथ मद्यालसाः
स्रष्टा सद्य इतो विताड़यति वा
युष्मान् क्षपागह्वरे ॥

॥ ४५ ॥




प्राणा नः क्षणिका स्तथैव रभसाः
कुर्या वृथा संशयं
गाढ़ाश्लेषमिमं रसात्मदर्पितं
संयाहि कुञ्जाश्रयम् ।
तूर्णं स्वर्णलते न सश्वरसि चेत्
पृथ्वी स्वयं सन्दिशेत्
मात्रासक्त इतः प्रलुप्तवपुषं
नेष्यत्यहो संलयम् ॥

॥ ४६ ॥

चुम्बामि प्रमदां रसोर्मिमदिरां
रक्ताश्च पात्राधरां
स्मेरास्यद्विलयं विशेहरनिशा
महाय हित्वा धराम् ।
कृष्णौष्ठा दिशते तमिस्त्रकबरी
मार्गं तु मां शर्वरी
मौहूर्तः प्रणयः कथं प्रणय उः
प्रीणामि न स्रग्धराम् ॥





॥ ४५ ॥

यावत्तु स्मयते सुरक्तकुसुमं नद्यास्तटे रञ्जनं
खैयामेन समं मदार्द्ररसने तावत् कृथा गुञ्जनम् ।
अन्ते मृत्युचरः सुतीव्रमधुरां यच्छेच्च तुभ्यं सुरां
गृह्णीयास्त्वरितं रसं तनुदहं भुङ्क्ष्वाथ कालाञ्जनम् ॥











॥ [illegible] ॥

यन्नु वाञ्छसि किं सुदुष्करतराः
सिद्धिकोटिः क्रमात्
संक्षेपेण हि ताः प्रवाप्स्यसि न
प्राज्ञो ध्रुवं सत्वरम् ।
सत्यासत्यगतप्रवेशकुशलः
सूक्ष्माकृतिः कुण्डली
द्योतयन्त्र इव क्षणं विलसिताः
प्राणाश्च सन्तुष्टयः ॥

॥ ६३ ॥

केशाग्रप्रमिता गुणौघनिचयाः
सर्वे गुणाः सात्त्विका
मायां कल्पयसे तु यां भवति सा
विश्वार्चितो बिम्बिका ।
ओङ्कारध्वनिकं निगूढभणितं
बुद्ध्या यदाऽऽकर्णितं
वर्ति हंसमता तदेव नमामि
ब्रह्मात्मनिर्देशिका ॥



॥ ५४ ॥

मन्ये तं जगतः शिरासु नियतं
लीलास्रुतं पारदं
नेत्रोल्लासकरं सुतिग्मसरणं
बध्नाति कस्तत्पदम् ?
मीने किञ्च मुनौ स एव वसते
पाने च पानव्रते
न स्यात् प्राप्तलयः क्षयिष्णुरपि वा
रूपं तु कृत्स्नाह्लदम् ॥

॥ ५५ ॥



नाट्याभ्यासरतिः प्रपञ्चनिपुणं
निर्माय रङ्गालयं
ग्रन्थानां रचकः कुशीलवचयः
स्याद्विश्वनाथः स्वयम् ।
मञ्चं घूर्णयते स दृश्यसुभगं
यस्मिन् जगद् दर्शितं
शम्भ्वाहह किं न पश्यति कृती
सृष्टिं स्थितिं वा लयम् ॥



॥ ६६ ॥

अद्यापि त्वमसि त्वमेव धरणौ
भुङ्क्षे तथाप्यम्बरं
पृथ्वीं प्रार्थयसे न पुष्कलरसां
दिव्यं तवागोचरम् ।
दुर्दैवं त्वधुना हि यत् प्रकटितं
तच्च श्व आस्ते वृतं
हा धिङ् मानुषिकं स्वसत्त्वमननं
किं ते भविष्यं परम् ?

॥ ६७ ॥

मिथ्या दुःखखनिं हि वेत्सि नरकं
स्वर्गं च सौख्याकरं
मुग्ध स्वप्नरते कथं न विशसि
प्रीत्यालयं सत्वरम् ?
तन्वी नर्मसखी विभाति वरदा
लीलाञ्चला सर्वदा
तस्या देहलिजं गृहाण तरसा
रोमाञ्चितं मञ्जरम् ॥





॥ ५८ ॥

नित्यं यापयसे मृषैव समयं द्वन्द्वे कुतर्के तथा
दृष्टा केन सखे नृकाम्यसरणि धूमावृता सर्वथा ।
द्राक्षावल्लिरिह प्रणोदयति नो भुक्त्यां सुधाकाङ्क्षिणो
हत्वोपांशु फलं भजस्व खलु तां मोक्षस्तव क्वान्यथा ?





॥ ६१ ॥

मन्ये मद्गणनं विदन्ति गुणिनो
दोषकर्मे वर्जितं
पृच्छ्याश्चङ्क्रमणं स्वकक्षसरणौ
जानाम्यहं निश्चितम्।
हेत्वाभास इति क्व वाऽस्त्यनुमिते
खैयामरेखाङ्किते
तस्यैकान्तरहो द्रुतं परिवृणे
कालं कराग्रे धृतम्॥





॥ ६२ ॥

चित्रं संघटितं परेद्युरपि नः
सायं हि पान्थालये
मूर्ता रश्मिमयी वराङ्गललना
स्वप्ने नु तन्द्रामये।
साऽपृच्छल्लभसे सुरामृतलवं
मर्त्ये चिरं दुर्लभम्?
द्राक्षावल्लिरसौ निपीय विदितो
दिव्यः स नान्यस्त्वये !!



॥ ६३ ॥

तादृक्षी मदिरा यदीयतृषिता-
स्तूष्णीं स्थिताः पण्डिताः
स्फूर्ता सा तटिनी रसोर्मिनिवहै-
र्न्याया यया प्लाविताः ।
सौवर्णीकुरुते हृदायसमहो
स्पर्शोपलासंग्रहः
प्रेक्ष्य ज्योतिरिदं सुगर्भणर्मनि
प्राज्ञा भृशं विस्मिताः ॥

॥ ६४ ॥

द्राक्षालब्धरसं प्रभुत्वसुलभं
मन्येऽपि गजनोपतिं
भोजेन्द्रच्छटया विधर्मिहतये
संख्येषु विद्युद्गतिम् ।
वैधर्म्यं गणये करालदशनं
शङ्कादनो वारणं
माध्वीकं हि नृणां हतार्तिहृदये
प्राप्नोति दिव्यारतिम् ॥



॥ ६५ ॥

यत्र विश्वसतो कृपाशिल्पलितो
चित्रैश्चिरं कीर्तितं
कृपणोरे निश्चलं निपीड्य रुचिरं
रक्तास्रुतं निःसृतम् ।
अक्षोभ्यात्मकरं विदन्ति सरलं
स्वीयान्विता केवलं
लौल्यतः लौरञ्जुचि सुराशिखरये
नारीविधं निश्चितम् ॥



॥ ६६ ॥

किं पारत्रिकभीः प्रमोदयति मां
त्यक्तुं नु सञ्जीवनीं
प्राप्स्ये कुत्र सुधां तु मर्त्यशिशिरे
चित्ताशुसन्दीपनीम् ?
तृष्णाग्नि हृदयं प्रधक्ष्यति यदा
श्रोष्यामि शास्त्रं तदा।
भग्ने पानिलके किमीप्सति सुधी-
र्माध्वीं मनोरञ्जनीम् ?।






॥ ६७ ॥

कालं यापयतां कृतर्ककलहो
रात्रिन्दिवं पण्डितौ
युञ्जे विश्वविधिं स्वयं तु सततं
पश्यन् विनाऽऽनन्दतः ।
मुक्त्वाली मदिरामुपांशु च भजे
निःशब्दरम्योटजे
भाग्यर्णञ्च सखि प्रशोधनमहं
कुर्वेऽहहाख्यान्वितः ॥

॥ ६८ ॥

चित्रं नात्र हि किं श्रुतं मम पुरो
ये यान्ति यायावराः
प्रत्यायान्ति न ते वृणाति जवनी
किं तान् चिरं गह्वरा ?
प्राप्य प्रेतपुरीं निरस्तहसिताः
सर्वेऽपि मौनं श्रिता
निःसङ्गं भ्रमता मयापि तिमिरे
संश्लिष्यते साऽन्तरा ॥





॥ ६७ ॥

कालं यापयतां कुतर्ककवलो
रात्रिन्दिवं पण्डितो
युध्ये विश्वविधिं स्वयं तु सततं
बन्धून् विनाऽतन्द्रितः ।
मुक्तथालीं मदिरामुपांशु च भजे
निःशब्दरम्योटजे
भाग्यर्णस्य सखि प्रशोधनमहं
कुर्वेऽट्टहास्यान्वितः ॥


॥ ६८ ॥

चित्रं नात्र हि किं द्रुतं मम पुरो
ये यान्ति यायावराः
प्रत्यायान्ति न ते वृणाति जवनी
किं तान् चिरं गह्वरा ?
प्राप्य प्रेतपुरीं निरस्तहसिताः
सर्वेऽपि मौनं श्रिता
निःसङ्गं भ्रमता मयापि तिमिरे
संश्लिष्यते साऽन्तरा ॥



॥ ४९ ॥

सन्न्यासव्यसना जटाश्चितकचा
भक्तिप्लुताः प्राक्तना
उन्निद्रा रजनौ प्रलापमुखराः
कुर्वन्ति सर्वे मन्त्रणाः।
क्लीवं नन्दयते तु कल्पितकथा
क्षिप्तं खपुष्पं यथा
मूका द्राङ् मुनयः सुषुप्तिमुदिता
लुप्ताः पुन र्जल्पनाः ॥





॥ ५० ।

आत्मा चेत् स्वतनुं जहाति हि यथ
जीर्णांशुकं मानवाः
तीर्त्वा वैतरणीं च नन्दनवने
संक्रीड़ते पुङ्गवः।
आश्चर्यं किमतोऽवनावरुचिरं
श्रित्वा शरीरं चिरं
मिथ्या स्वप्नजड़ो रिरंसत उत
भ्रान्तो विषादाप्लवः ॥



॥ ७१ ॥

आत्मा देहनृप स्तदीयवसति र्मौहूर्तपान्थालयः
सम्राजो वचनं श्रुतं तु सहसा वज्रस्वनं कर्णयोः ।
उद्विग्नो झटिति प्रधावति यदा कक्षं प्रविष्टास्तदा
निर्मातुं शयनं नृपान्तरकृते भृत्या न मे संशयः ॥

॥ ७२ ॥

आत्माऽलक्ष्यपथे सकौतुकमये
सद्यो मया प्रेषितो
वार्तामानयते रहस्यलसनां
केनापि निर्देशितः ।
प्रत्यावर्तत स प्रहर्षणकल-
स्तृप्तश्च कौतूहलः
स्वर्गो वा नरकं न तिष्ठति वहि-
र्वासस्तु मे ज्ञापितः ॥





॥ ७३ ॥

जानामि त्रिदिवं नृमर्मनिलयं
रम्यं न शून्यस्थितं
दावाग्नेः सदृशं हृदिस्थनरकं
दूष्यानुतापान्वितम् ।
अस्माकं सदनं वृणाति गहनं
भाग्यस्य कृष्णाङ्कनं
प्रेक्षे हन्त ततो नरं प्रकटितं
तत्रैव चान्तर्हितम् ॥



॥ ७४ ॥

ऊर्ध्वं वा गगनं दिगञ्चलधृतं
निम्ने धराप्राङ्गणं
विश्वान्तश्च वहि स्तनोनि परितो
मायेन्द्रजालाञ्जनम् ।
केन्द्रे वर्तिसमः स्वयं ग्रहवरः
सन्दृश्यते भास्करः
छायापुत्तलिका नियन्त्रितपदा
नृत्यन्ति जीवाः क्षणम् ॥

॥ ७५ ॥

अक्षैः किञ्च नरैः करोति नियति-
र्दूथतात्मकं क्रीड़नं
कृष्णैः रात्रिचयैः सितैश्च दिवसैः
क्षेत्रं कृतं शोभनम् ।
चाल्यन्ते गुटिकाः प्रतिक्षणमहो
तस्याः किमप्याग्रहः
सर्वाः संख्यहताः करङ्कनिहिताः
शून्यञ्च खेलाङ्गनम् ॥

॥ ७६ ॥

मन्ये क्रीड़नका श्चलन्ति न तथा
तिष्ठन्ति वा स्वेच्छया
भाग्याङ्घ्रिप्रहता स्तु मन्दगतयः
क्रामन्ति वेगाश्रयाः ।
विश्वेशो मनुजान् कथं नु सृजति
क्वास्ते नियत्या गतिः
गूढार्थो जगतो नृणामविदितो
विज्ञायते चेत्तया ॥





॥ ७७ ॥

भाग्यं खण्डयितुं ललाटलिखितं
किं काङ्क्षसे निश्चितं
दुर्लङ्घ्यं नियते र्यदेव लभसे
तत्ते चिरं स्वीकृतम् ।
नैकां पंक्तिमतो निवर्तयति सा
वाञ्छन्ति चेत् त्वादृशाः
नाश्रं धर्मरति निरस्यति सखे
स्तोकेन रेखाङ्कितम् ॥



॥ ७८ ॥

निम्नास्यं कलसं विदन्ति निखिलाः
स्निग्धं सुनीलाम्बरं
यस्याधो मनुजः सरीसृपसमो
जङ्गम्यते निःस्वरम् ।
उत्थाप्य स्वकरौ ततस्तु सततं
भिक्षां नु याचे कथं
नृणां तुल्यमहो स्वयं हि नियते-
र्मृग्येद् वराकं वरम् ॥

॥ ७९ ॥

आ सृष्टेः धरणी स्वगर्भगहने
पुष्णाति बीजाङ्कुरं
भाले देहभृतां लिलेख नियति-
र्भाग्यं न यद् भङ्गुरम् ।
तस्याः पाण्डुलिपि श्चिरन्तनकृतेः
पूर्णाकृतिः सुस्मिते
यत्पत्रप्रचयं पठामि दिवसं
लब्ध्वाऽन्तिमं मेदुरम् ॥



॥ ८० ॥

सर्वं त्वद्यतनं प्रणर्तनमिदं
स्पृष्टं ह्यतीताङ्गने
भाविप्राप्यफलं तथैव निखिलं
स्याद्ध वर्तमानक्षणे ।
पात्रं विस्मृतये हृदोन्मदकरं
पूर्णीकृथाः सत्वरं
कुत्र त्वं च कथं प्रयासि सहसा
ज्ञास्ये न लोलेक्षणे ॥



॥ ८१ ॥



भूतार्थं कथये नृजन्मरहसो—
रात्र्यामहं स्वर्गतः
प्रारुह्य प्रसभं शिखाङ्कतुरगं
ह्यन्येद्यु रत्रागतः ।
पश्यामि स्म यदा सुपर्णलसितं
दिव्याङ्कुरं सस्मितं
द्राक्षावल्लिरियं तदैव विदिता
यस्या रसः सम्मतः ॥



॥ ८२ ॥

दृाक्षाया लतिका तदा प्रभृति मे
जाता हृदो रञ्जिका
तथ्योद्धारकृते मदस्थिरचिता
मोक्षायतिः कुञ्चिका ।
सान्तोरागसुदा शृणोमि हसनं
तिक्तं द्विपां निन्दनं
सुफ्याख्याः करुणं रुदन्ति तु वही
रङ्गालयान्मार्मिकाः ॥

॥ ८३ ॥

खैयामेन सखि प्रलब्धमननौ
गूढात्मकं दर्शनं
प्रेमांशुं नु हृदः प्रदीपयति यत्
कुर्यात् किमु ध्वंसनम् ।
ईशार्चासदने न दृश्यमपि चेत्
पानालयं तद्विशेत्
मिथ्याऽतो भजनं सुरास्यलसितं
सत्यं सुरास्यन्दनम् ॥



Scanned by CamScanner

॥ ८४ ॥


ज्ञात्वा नित्यमतः प्रमायिकमये
जातो रुषा विस्मयः
फुत्कारैः क्रियते मृदंगनिवहे
येनासुवात्योदयः ।
जीवान् दुःखचय स्तुदेत्तु वदति
त्याज्यं सुखं सम्प्रति
भ्रान्तिश्चेत् सुचिरं नरान् स नरके
क्लिश्नाति विश्वाश्रयः ॥





॥ ८५ ॥

दत्ता श्यामिकया वयं हि कनकं
कीदृक्षमहो व्यंसनं
सर्वस्वं तु हृतं यदैव दिशते
यच्छामलं काञ्चनम् ।
अस्माभिः क्व नु तद् ऋणं कलुषितं
स्तोकेन वा काङ्क्षितं
निस्त्रिंशः स कथं विडम्बयति नो
जाने न धिग् दुर्जनम् ॥



॥ ८६ ॥

रक्ताक्षः कुमति र्लभेत न हि मे
पुष्पाद्य मस्नान्वितं
वक्ष्येऽहं शपथै र्न चाटुनिपुणं
गास्यामि तद्वन्दितम् ।
श्रद्धा यस्य भवेद् भयात्मविरुता
भिक्षाकृते भिक्षुता
प्राप्णोति श्रमणः स पान्थसदने
सम्मार्जनीलाञ्छितम् ॥

॥ ८७ ॥

मत्यें विश्वपते त्वयैव रचितः
पन्थास्तमोलाञ्छनः
पङ्कानायचय स्तथा प्रतिपदं
छद्मामराक्रीड़नः ।
भाग्येन प्रसभं सहस्तयुगलं
देहं कृतं सार्गलं
किं निन्द्येत मम भ्रमस्तदपि भोः
क्रान्त्यां पदस्खालनः ॥





॥ ८८ ॥

क्षीगांगामसृज स्त्वमेव नृतनुं कार्पण्यकृष्णाञ्जनां
ज्ञानास्वादफलैः सुकाम्यकवने सर्पात्मिकां वञ्चनाम् ।
कृष्णास्यं यदिदं कलङ्ककलुषं त्वद्दुर्ग्रहै र्मानुषं
मृग्यामि त्वदहं क्षमां किमिह मे त्वं भिक्षसे मार्जनाम् ॥



॥ ८९ ॥

भूयः सायमहं गतः सकुतुकं
पूर्वोक्तहट्टालयं
कुम्भानां श्रुतवान् मिथः किमिव भो
रम्यं वितर्कोच्चयम् ।
को वा वाग्मिवरः सलज्जवदन-
श्चान्यस्तथा सुस्वनः—
"कः कुम्भेश" इति प्रवीणकलसो
ब्रूते—"कथं मृण्मयम्" ॥

॥ ९० ॥

विज्ञो वक्ति- "वयं कुलालतनयाः
शिल्पालये निर्मिताः
तिष्ठामो धरणौ सुरामृतहृताः
स्रष्ट्रा चिरं रक्षिताः" ।
तच्छ्रुत्वा प्रमदा करोति भणितं
कुम्भांगना सस्मितं—
"पात्राणि क्व नु वा क्षिपन्ति शिशवः
स्वीयानि रोषान्विताः "॥



। ६१ ।

तूष्णीं कुम्भजनाः स्थिताः क्षणमथ
प्रोवाच वक्रेक्षितो—
"मन्निर्मातुरहो मनाङ् ननु करो
वार्धक्यसाचीकृतः ।"
खर्वांगी कलसी सुतिक्तरसना
ब्रूते—"कुतः सान्त्वना
मन्ये पात्रगणे न शौण्डिकखलः
पित्रीयतेऽतन्द्रितः ॥"



॥ २ ॥



दीर्घश्वासमथ ब्रवीति कलसो
"हा हन्त मे दुर्ग्रहः !
तृप्तिं याति सुरां यदैव लभते
देहश्चिरं दुर्वहः ।"
चित्रं नात्र सखे सजीवजड़यो-
रतुल्योहि चिन्ताचयः
मुग्धः कोऽपि तथा द्वितीयहृदये
जागर्ति तत्त्वाग्रहः ॥



। ६३ ॥

इत्थं तत्त्वरतैः प्रलापमुखरैः रात्रि र्यदा मन्दिता
दृष्टा प्रातिपदी सुधाकरकला सान्ध्याम्बरे सुस्मिता।
सर्वे ते युगपद् ब्रुवन्ति वचनं विस्मृत्य मृद्दर्शनं—
"मन्ये मञ्जुसुरां प्रदास्यति सखी तृष्णाहरीं वन्दिता" ॥

॥ ६४ ।

आ मृत्योः रभसे निरन्तरमये
पास्यामि रक्तासवं
लीलान्ते ललने सुरामृतरसैः
प्रक्षालय त्वं शवम् ।
द्राक्षापर्णचयं विकीर्य वसने
प्रेद्यामले कानने
देहं मर्मसखैः समाधिशयने
संस्थाप्यतां नीरवम् ॥



॥ ६५ ॥



ज्वाला नास्ति तनोः प्रचण्डतपनाद्
भूम्यास्तले शीतले
पुष्पैः भान्ति दिशो रुवन्ति विहगाः
कुञ्जे तथा शाद्वले ।
नृत्येन्निर्झरिणी प्रसूनकवरी
दोदुल्यते वल्लरी
रागो मृत्युहतः निसर्गकृपया
भूयः स्मृतो विह्वले ॥

। ६६ ॥

किंस्विन्मे मदिरा समाधेरुपरि
स्तोकेन रक्ताञ्जनं
जालं स्थापयते परोग्रसुरभिं
प्रात र्मनोरञ्जनम् ।
भण्डो मद्यवृणः पुरोहितवर-
श्चिन्ताकुलो मन्थरो
नासाविस्फुरितः प्रयाति चकितं
हर्षाप्लवं नन्दनम् ॥

। ६७ ।

नेत्रं वाष्पवशं गतं प्रतिदिनं
सर्म्मानुतापं तथा
यानर्चामि भृशं त एव नियतं
निन्दन्ति मां सर्वथा ।
पात्रं मज्जयते सखा सुवदने
मानं च हट्टांगने
विक्रीणीत इह प्रतप्तहृदयं
ख्यातेस्तु मे का कथा ॥



॥ ६८ ॥

कामं भोः शपथैर्मया हि मदिरा
त्यक्तैकदा निश्चितं
मादावेगवशात् तदेव घटितं
नोचेत् कथं विस्मृतम् ।
आयाति प्रसवैः पुनर्भवमधुः
पश्चाच्च माध्वीवधूः
सर्वं मे शपथं निरस्यति सुधा
यत्प्रेम पारत्रिकम् ॥





॥ ६९ ॥

हा धिङ् नर्मलतां विधर्मिसदृशां
केतुं कवे दुर्ग्रहं
सौराचिमुकुटं स्वसद्मनि यया
भूलुण्ठितं प्रत्यहम् ।
भूतार्थं कथये तथाप्यनुदिनं
निन्दाम्यहं शौण्डिनं
क्रीणीते कलसं तु यो जड़मति-
र्विक्रीय हतसंग्रहम् ॥

॥ १०० ।



हा हन्त प्रगता सुरक्तकुसुमै-
वासन्तयामी यथा
छिन्ना पाण्डुलिपि र्नृ यौवनरुचि-
र्गन्धः प्रलीनस्तथा ।
नित्यं कण्ठरवैरमोहयत नो
नक्तंगमः सुस्वनः
प्रीत्यागत्य कुतः पुनः क्व चलति
क्लिश्नाति मर्मव्यथा ॥

॥ १०१ ॥

शीर्णा कामयते हि गुल्मलतिका
स्नातं हिमैः प्रान्तरं
तृष्णार्तः पथिक स्तथेप्सति खिले
पानाञ्जलिं कातरम् ।
स्वल्पाद्भिः किमिव क्रियते मुदितं
तन्मानसं निश्चितं
किं लप्स्येऽहमये नृजीवनमरौ
प्रमोच्छलं निर्भरम् ॥



॥ १०२ ॥

हन्त प्रेयसि मे नृणां न नियतिः
किं काङ्क्षते वन्दनं
तद्धव्ये ललितं प्रदेहि सखि नौ
विश्वस्य चित्राङ्कनम् ।
लब्धं तन्निमिषं स्वहस्तनखरै-
श्छेत्स्यामि रक्तक्षरैः
निर्मावश्च पुनो मुदाऽतुलजगन्-
मुक्तं हृदो रञ्जनम् ॥



॥ १०३ ॥



चित्ताकाश इह त्वमेव सुतनो
पूर्णेन्दुकान्तिः स्वयं
पश्योर्ध्वं गगने नवेन्दुकलिकां
हास्यैर्निहन्त्रीं क्षयम् ।
तूर्णं पूर्णतनु विभाति च यदा
राकार्चिता सा तदा
किं दृष्ट्वा निलयं तिरोहितजनं
संशुच्यते मे लयम् ॥



॥ १०४ ॥

उद्यानं हि तव प्रभातरलया कान्त्या कृथा विस्मितं
सर्वे तेऽतिथयः श्लथाश्चलमथ दृक्ष्यन्ति तारान्वितम्।
खैयामस्तु तदा सुरार्पणरते न त्वद्वरं काङ्क्षते
स्मृत्वा मां नु सकृत् प्ररिक्तमवनौ पात्रं स्पृशे भङ्कृतम्॥

—समाप्तमिदं काव्यम्—